CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

366

UNIVERSITY OF POONA

Second Year B.A. (Semesters III & IV)

SANSKRIT SELECTIONS No. 2

Prescribed for the Examinations 1979, 1980 & 1981

Editorial Committee

Prin. R. H. Gadgil

Dr. D. V. Garge

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

UNIVERSITY OF POONA

Second Year B.A. (Semesters III & IV)

SANSKRIT SELECTIONS No. 2

Prescribed for the Examinations 1979, 1980 & 1981

Editorial Committee

Prin. R. H. Gadgil

Dr. D. V. Garge

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Printed at :

Poona University Press,
Ganeshkhind,
Pune–7.

Printed & Published by :

Shri G. J. Abhyankar,
Registrar,
University of Poona.

© University of Poona.

Price : Rs. 2 (Two)

1000-7-78 (154)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

PUBLISHER'S NOTE

The University of Poona has great pleasure in publishing the Sanskrit Selections No. 2 prescribed for the Second Year B. A. Course (Semesters III and IV). These Selections have been prepared by the Editorial Committee consisting of Prin. R. H. Gadgil and Dr. D. V. Garge.

The University is grateful to the Editors for assisting the University in bringing out these Selections.

G. J. Abhyankar
Registrar.

Date : 14-7-1978.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनुक्रमणिका

१.	सीतात्यागः ।	१–३
२.	गोमिनीवृत्तान्तः ।	४–६
३.	बन्धविमोचनम् ।	७–१०
४.	प्रजापतेर्ब्रह्मोपदेशः ।	११
५.	(अ) शुककथा ।	१२–१३
५.	(ब) भृत्यगुणाः ।	१४
६.	काव्यकृतः प्रति नृपतेर्भोजस्यौदार्यम् ।	१५–१७
७.	क इदं दुष्करं कुर्यात् ।	१८–२३
८.	द्रौपदीकृता युधिष्ठिरस्य निर्भर्त्सना ।	२४–२५
९.	कविवाङ्निर्मितिः काव्यप्रयोजनानि काव्यहेतुश्च ।	२६–२७
१०.	अनुजीविवृत्तम् ।	२८–२९
११.	भक्तियोगः ।	३०–३१

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१. सीतात्यागः ।

स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ।
सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ॥ ३१ ॥

निर्बन्धपृष्टः स जगाद सर्वं स्तुवन्ति पौराश्चरितं त्वदीयम् ।
अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः ॥ ३२ ॥

कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्तिविपर्ययेण ।
अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे ॥ ३३ ॥

किमात्मनिर्वादकथामुपेक्षै जायामदोषामुत सन्त्यजानि ।
इत्येकपक्षाश्रयविक्लवत्वादासीत्स दोलाचलचित्तवृत्तिः ॥ ३४ ॥

निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् ।
अपि स्वदेहात्किमुतेन्द्रियार्थाद्यशोधनानां हि यशो गरीयः ॥ ३५ ॥

स संनिपात्यावरजान्हतौजास्तद्विक्रियादर्शनलुप्तहर्षान् ।
कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यम् ॥ ३६ ॥

राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ॥ ३७ ॥

पौरेषु सोऽहं बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम् ।
सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेन्द्रः ॥ ३८ ॥

तस्यापनोदाय फलप्रवृत्तौ उपस्थितायामपि निर्व्यपेक्षः ।
त्यक्ष्यामि वैदेहसुतां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव ॥ ३९ ॥

अवैमि चैनामनघेति किन्तु लोकापवादो बलवान्मतो मे ।
छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः ॥ ४० ॥

रक्षोवधान्तो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय ।
अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ॥ ४१ ॥

तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः ।
यद्यर्थिता निर्हृतवाचशल्यान्प्राणान्मया धारयितुं चिरं वः ॥ ४२ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशम् ।
न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुमोदितुं वा ॥ ४३ ॥

स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्तिः ।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ॥ ४४ ॥

प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम् ॥ ४५ ॥

स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥ ४६ ॥

अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तधुरं तुरङ्गैः ।
रथं सुमन्त्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे ॥ ४७ ॥

सा नीयमाना रुचिरान्प्रदेशान्प्रियङ्करो मे प्रिय इत्यनन्दत् ।
नावुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम् ॥ ४८ ॥

जुगूह तस्याः पथि लक्ष्मणो यत्सव्येतरेण स्फुरता तदक्ष्णा ।
आख्यातमस्यै गुरु भावि दुःखमत्यन्तलुप्तप्रियदर्शनेन ॥ ४९ ॥

सा दुर्निमित्तोपगताद्विषादात्सद्यः परिम्लानमुखारविन्दा ।
राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः ॥ ५० ॥

गुरोर्नियोगाद्वनिता वनान्ते साध्वीं सुमित्रातनयो विहास्यन् ।
अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात् ॥ ५१ ॥

रथात्स यन्त्रा निगृहीतवाहात्तां भ्रातृजायां पुलिनेऽवतार्य ।
गङ्गां निषादाहृतनौविशेषस्ततार सन्धामिव सत्यसन्धः ॥ ५२ ॥

अथ व्यवस्थापितवाक्कथञ्चित्सौमित्रिरन्तर्गतवाष्पकण्ठः ।
औत्पातिकं मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार ॥ ५३ ॥

ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ॥ ५४ ॥

इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः ।
इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननी न तावत् ॥ ५५ ॥

सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतान्तः ।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः ॥ ५६ ॥

न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनाद्दतेऽपि ।
आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिन्द ॥ ५७ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः ॥ ५८ ॥

सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौम्य चिराय जीव ।
विडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वम् ॥ ५९ ॥

श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः ।
प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति ॥ ६० ॥

वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ॥ ६१ ॥

कल्याणबुद्धेरथ वा तवार्यं न कामचारो मयि शङ्कनीयः ।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ॥ ६२ ॥

उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः ।
तदास्पदं प्राप्य तयातिरोषात्सोढास्मि न त्वद्भवने वसन्ती ॥ ६३ ॥

निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् ।
भूत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने ॥ ६४ ॥

किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हृतजीवितेऽस्मिन् ।
स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ॥ ६५ ॥

साऽहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥ ६६ ॥

नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः ।
निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ॥ ६७ ॥

तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते ।
सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विघ्ना कुररीव भूयः ॥ ६८ ॥

नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि ॥ ६९ ॥

तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥ ७० ॥

कविकुलगुरुणा कालिदासेन प्रणीतस्य महाकाव्यस्य 'रघुवंश'—
संज्ञितस्य चतुर्दशसर्गतः श्लोकाः ३१ तः ७० पर्यन्तम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२. गोमिनीवृत्तान्तः ।

'अस्ति द्रविडेषु काञ्ची नाम नगरी। तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्। सोऽष्टादशवर्षदेशीयश्चिन्तामापेदे—'नास्त्यदाराणामननुगुणदाराणां वा सुखं नाम। तत्कथं नु गुणवद्विन्देयं कलत्रम्' इति। अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं सम्पत्तिमनभिसमीक्ष्य कार्तान्तिको नाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम। 'लक्षणज्ञोऽयम्' इत्यमुष्मै कन्याः कन्यावन्तः प्रदर्शयाम्बभूवुः। यां काञ्चिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा स किल स्म ब्रवीति—'भद्रे, शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुम्' इति। स हसितावधूतो गृहाद्गृहं प्रविश्याभ्रमत्।

एकदा तु शिविषु पट्टने सह पितृभ्यामवसितमहर्धिमवशीर्णभवनसारां धात्र्या प्रदर्श्यमानां काञ्चन विरलभूषणां कुमारीं ददर्श। अस्यां संसक्तचक्षुश्चातर्कयत्—'अस्याः खलु कन्यकायाः सर्व एवावयवा नातिस्थूला नातिकृशा नातिह्रस्वा नातिदीर्घा न विकटा मृजावन्तश्च। रक्ततलाङ्गुली यवमत्स्यकमलकलशाद्यनेकपुण्यलेखालाञ्छितौ करौ, समगुल्फसन्धी मांसलावशिरालौ चाङ्घ्री, जङ्घे चानुपूर्ववृत्ते पीवरोरुग्रस्ते इव दुरुपलक्ष्ये जानुनी, सकुद्विभक्तश्चतुरस्रः ककुन्दरविभागशोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः, तनुतरग्रीषन्निम्नं गम्भीरं नाभिमण्डलम्, वलित्रयेण चालङ्कृतमुदरम्, उरोभागव्यापिनावुन्नम्रचूचुकौ विशालारम्भशोभिनौ पयोधरौ, धनधान्यपुत्रभूयस्त्वचिह्नलेखालाञ्छिततले स्निग्धोदरकोमलनखमणीक्ष्ज्वनुपूर्ववृत्ताताम्राङ्गुली संनतांसदेशे सौकुमार्यवत्यौ निमग्नपर्वसन्धी च बाहुलते, तन्वी कम्बुवृत्तबन्धुरा च कन्धरा, वृत्तमध्यविभक्तरागाधरम् असंक्षिप्तचारुचिबुकम् आपूर्णकठिनगण्डमण्डलम् सङ्गतानुवक्रनीलस्निग्धभ्रूलतम् अनतिप्रौढ-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तिलकुसुमसदृशनासिकम् अत्यसितधवलरक्तत्रिभागभासुरमधुराधीरसञ्चारमन्थरायतेक्षणम् इन्दुशकलसुन्दरललाटम्, इन्द्रनीलशिलाकाररम्यालकपङ्क्ति द्विगुणकुण्डलितम्लाननालीकनाललालितलम्बश्रवणपाशयुगलमाननकमलम्, अनतिभङ्गुरो बहुलः पर्यन्तेऽप्यकपिलरुचिरायामानेकैकनिसर्गसमस्निग्धनीलो गन्धग्राही च मूर्धजकलापः। सेयमाकृतिर्न व्यभिचरति शीलम्। आसज्जति च मे हृदयमस्यामेव। तत्परीक्ष्यैनामुद्वहेयम्। अविमृश्यकारिणां हि नियतमनेकाः पतन्त्यनुशयपरम्पराः' इति। स्निग्धदृष्टिराचष्ट—'भद्रे, कच्चिदस्ति कौशलं शालिप्रस्थेनानेन सम्पन्नमाहारमस्मानभ्यवहारयितुम्' इति।

ततस्तया वृद्धदासी साकूतमालोकिता। तस्य हस्तात्प्रस्थमात्रं धान्यमादाय क्वचिदलिन्दोद्देशे सुसिक्तसंमृष्टे दत्तपादशौचमुपावेशयत्। सा कन्या तान्गन्धशालीन्संक्षुद्य मात्रया विशोष्यातपे मुहुर्मुहुः परिवर्त्य स्थिरसमायां भूमौ नालीपृष्ठेन मृदुमृदु घट्टयन्ती तुषैरखण्डैस्तण्डुलान्पृथक्चकार। जगाद च धात्रीम्—'मातः, एभिस्तुषैरर्थिनो भूषणजाक्रियाक्षमैः स्वर्णकाराः। तेभ्य इमान्दत्त्वा लब्धाभिः काकिणीभिः स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितम्पचां स्थालीमुभे शरावे चाहर' इति। तथाकृते तया तांस्तण्डुलाननतिनिम्नोत्तानविस्तीर्णकुक्षौ ककुभोलूखले लोहपत्रवेष्टितमुखेन समशरीरेण विभाव्यमानमध्यतानवेन व्यायतेन गुरुणा खादिरेण मुसलेन चतुरललितक्षेपणोत्क्षेपणायासितभुजमसकृदङ्गुलीभिरुद्धृत्योद्धृत्यावहत्य शूर्पशोधितकणकिंशारुकांस्तण्डुलानसकृदद्भिः प्रक्षाल्य कथितपञ्चगुणे जले दत्तचुल्लीपूजा प्राक्षिपत्। प्रथमावयवेषु प्रस्फुरत्सु तण्डुलेषु मुकुलावस्थामतिवर्तमानेषु संक्षिप्यानलमुपहितमुखपिधानया स्थाल्यान्नमण्डमगालयत्। दर्व्या चावघट्य मात्रया परिवर्त्य समपक्वेषु सिक्थेषु तां स्थालीमधोमुखीमवातिष्ठिपत्। इन्धनान्यन्तःसाराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत्—'एभिर्लब्धाः काकिणीर्दत्त्वा शाकं घृतं दधि तैलमामलकं

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चिञ्चाफलं च यथालाभमानय' इति। तथानुष्ठिते च तया द्वित्रानुपदंशानुपपाद्य तदन्नमण्डमार्द्रवालुकोपहितनवशरावगतमिति मृदुना तालवृन्तानिलेन शीतलीकृत्य सलवणसम्भारं दत्ताङ्गारधूपवासं च संपाद्य तदप्यामलकं श्लक्ष्णपिष्टमुत्पलगन्धि कृत्वा धात्रीमुखेन स्नानाय तमचोदयत्। तया च स्नानशुद्धया दत्ततैलामलकः क्रमेण सस्नौ। स्नातः सिक्तमृष्टे कुट्टिमे फलकमारुह्य पाण्डुहरितस्य त्रिभागशेषलूनस्याङ्गणकदलीपलाशस्योपरि दत्तशरावद्वयमार्द्रमभिमृशन्नतिष्ठत्। सा तु तां पेयामेवाग्रे समुपाहरत्। पीत्वा चापनीताध्वक्लमः प्रहृष्टः प्रक्लिन्नसकलगात्रः स्थितोऽभूत्। ततस्तस्य शाल्योदनस्य दर्वीद्वयं दत्त्वा सर्पिर्मात्रां सूपमुपदंशं चोपजहार। इमं च दध्ना च त्रिजातकावचूर्णितेन सुरभिशीतलाभ्यां च कालशेयकाञ्जिकाभ्यां शेषमन्नमभोजयत्। सशेष एवान्धस्यसावतृप्यत्। अयाचत च पानीयम्। अथ नवभृङ्गारसंभृतगुरुधूपधूपितमभिनवपाटलाकुसुमवासितमुत्फुल्लोत्पलग्रथितसौरभं वारि नालीधारात्मना पातयांबभूव। सोऽपि मुखोपहितशरावेण हिमशिशिरकणकरालितारुणायमानाक्षिपक्ष्मा धारारवाभिनन्दितश्रवणः स्पर्शसुखोद्भिन्नरोमाञ्चकर्कशकपोलः परिमलप्रवालोत्पीडफुल्लघ्राणरन्ध्रो माधुर्यप्रकर्षवर्जितरसनेन्द्रियस्तदच्छं पानीयमाकण्ठं पपौ। शिरःकम्पसंज्ञावारिता च पुनरपरकरकेणाचमनमदत्त कन्या। वृद्धया तु तदुच्छिष्टमपोह्य हरितगोमयोपलिप्ते कुट्टिमे स्वमेवोत्तरीयकर्पटं व्यवधाय क्षणमशेत। परितुष्टश्च विधिवदुपयम्य कन्यां निन्ये। नीत्वैतदनपेक्षः कामपि गणिकामवरोधमकरोत्। तामप्यसौ प्रियसखीमिवोपाचरत्। पतिं च दैवतमिव मुक्ततन्द्रा पर्यचरत्। गृहकार्याणि चाहीनमन्वतिष्ठत्। परिजनं च दाक्षिण्यनिधिरात्माधीनमकरोत्। तद्गुणवशीकृतश्च भर्ता सर्वमेव कुटुम्बं तदायत्तमेव कृत्वा तदेकाधीनजीवितशरीरस्त्रिवर्गं निर्विवेश। तद्ब्रवीमि—'गृहिणः प्रियहिताय दारगुणाः' इति।

—कविना दण्डिना विरचिते दशकुमारचरिते—षष्ठोच्छ्वासात्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३. बन्धविमोचनम् ।

कारालयान्तः सुदृढं निबद्धः किंकार्यतामूढमतिः शिवाजिः ।
अनन्यभावेन हृदाऽनिशं तं भावैकगम्यं प्रभुमेव भेजे ॥ १ ॥

" संसारपाशेन दृढावनद्धान् त्वं मोचयस्यार्तहृदः स्वभक्तान् ।
तन्मां कथं म्लेंच्छमहीशपाशे बध्नासि मुक्तिप्रवणं दयालो ॥ २ ॥

दुष्पारतन्त्र्येण चिरस्य बद्धान् जनानिमान् मोचयितुं सयत्नः ।
योऽहं प्रभो ! त्वत्कृपया सदाऽऽसं बध्नासि तं मां कथमात्मदासम्
॥ ३ ॥

मया हि कामान्धदृशा कदाचिद् विलोकिता काचन चेत् परस्त्री ।
हृद्देशवासिन् ! कृतकर्मसाक्षिन् ! कारालये मेऽत्र वरं प्रणाशः ॥ ४ ॥

लोभाभिभूतेन मया कदाचित् स्वस्यैव भोगाय जगन्निवास ।
हृतं धनं चेद् धनिनः प्रसह्य कारालये मेऽत्र वरं प्रणाशः ॥ ५ ॥

क्रोधप्रमत्तेन मया कथंचिद् हतः शिशुर्वा स्थविरोऽथ रुग्णः ।
दयानिधे ! तत्फलभागिनो हि कारालये मेऽत्र वरं प्रणाशः ॥ ६ ॥

विद्वेषमूढेन मया क्वचिच्चेत् निःपातितं मन्दिरमन्यदीयम् ।
दुष्कर्मणस्तस्य फलाय देव कारालये मेऽत्र वरं प्रणाशः ॥ ७ ॥

प्रमाणभूतः परकीयधर्मग्रन्थो मया जातु विनाशितश्चेत् ।
धर्मद्रुहो दुष्कृतिनः परात्मन् कारालये मेऽत्र वरं प्रणाशः ॥ ८ ॥

मातुः पितुर्वाऽथ गुरोः कदाचित् कृतं मया चेत् प्रतिकूलभूतम् ।
देवद्रुहोऽक्षम्यकुकर्मणो हि करालये मेऽत्र वरं प्रणाशः ॥ ९ ॥

कर्ताऽथवा कारयिता त्वमेवेत्येतद्धि विस्मृत्य मनोऽभवच्चेत् ।
स्वकर्तृतामच्छमिदं मदीयं कारालये मेऽत्र वरं प्रणाशः ॥ १० ॥

नो चेत् त्वदीये खलु पुण्यकार्ये बद्धव्रतं मां तव दासदासम् ।
विमोचयास्मादतिघोरबन्धाज्जिजातनूजं हतजीविताशम् ॥ ११ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नाद्यापि तीर्थान्यखिलानि पुण्यान्युन्मोचितानीश कुदास्यपाशात् ।
तन्मोचनायैव हि मां कृपालो विमोचयास्मादतिघोरबन्धात् ॥ १२ ॥

अद्यापि पापैर्यवनैर्हृतानामाक्रन्दनान्यार्तकुलाङ्गनानाम् ।
श्रूयन्त एवात्र पवित्रदेशे तन्मुक्तये मोचय मां परात्मन् ॥ १३ ॥

गोब्राह्मणानां परिपालनाय बाल्यात् प्रभृत्येव धृतव्रतोऽस्मि ।
व्रतस्य तस्येश्वर! पूरणार्थं कुरुष्व मां बन्धनपाशमुक्तम् ॥ १४ ॥

स प्रार्थयन्नेवमहर्निशं तं विश्वेश्वरं भक्तिपरिप्लुतात्मा ।
कदाचन ध्याननिमीलिताक्षो व्यलोकयद्दृश्यमदृष्टपूर्वम् ॥ १५ ॥

कारागृहे लब्धजनुं स्वपुत्रं समुद्रके सुष्ठु निवेशितं च ।
मूर्ध्ना वहन्तं यमुनाप्रवाहे ददर्श साक्षाद् वसुदेवमन्तः ॥ १६ ॥

विमुक्त्युपायं तमवेक्ष्य दिव्यं ध्यानावलम्बेन हृदा तदानीम् ।
स्वमुक्तिकार्यं सहसा बभूव लब्धप्रकाशः सुतरां शिवाजिः ॥ १७ ॥

ततोऽनुमत्या यवनाधिपस्य भृत्येष्ववाचीं प्रति निर्गतेषु ।
रहः प्रविष्टः पुररक्षकं तं फौलादखानं स उवाच मन्दम् ॥ १८ ॥

प्रवीर नूनं नगरेऽत्र भव्ये त्वमेव मे भ्रातृसमः सखासि ।
यन्मामिहानन्यसहायमार्तं रात्रिन्दिवं रक्षसि जागरूकः ॥ १९ ॥

न न्यूनमत्र त्वदनुग्रहेण सुखाय मे वाऽथ मदात्मजस्य ।
तथापि शान्तिं भजते न चेतो गूढेच्छया मित्र वितुद्यमानम् ॥२०॥

वचस्तदाकर्ण्य तदा शिवस्य फौलादखानः स पुराधिकारी ।
प्रफुल्लचक्षुः स्फुटशोणदन्तः प्रोवाच राजन् वद का तवेच्छा ॥ २१ ॥

प्रसन्नमालोक्य तदीयमास्यं शुचिस्मितोऽसौ पुनरप्युवाच ।
शुभेऽधुना श्रावणमासि नित्यं मिष्टान्नदाने त्वरते मनो मे ॥ २२ ॥

वर्षानिमित्तं बत दूरदेशे न स्वास्थ्यमत्रानुभवामि किञ्चित् ।
मिष्टान्नतुष्टैः सुजनैः प्रदत्तैराशीर्वचोभिर्भविकं भवेन्मे ॥ २३ ॥

औरङ्गजेबस्य शिवाजिघातं विचिन्तनग्रस्तधियोऽधिगम्य ।
मिष्टान्नदानेऽनुमतिं तदैव संरक्षकः स्वानुमतिं ददौ सः ॥ २४ ॥

ततोऽन्वहं भारहरा बलिष्ठाः सूर्यास्तकाले शिवसद्मनस्ते ।
मिष्टान्नपूर्णान् बृहतः करण्डान् दानाय निन्युर्मठमन्दिराणि ॥ २५ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शुचिव्रतेभ्यः प्रतिपद्यमानं मिष्टान्नमेतन्न हि दूषणीयम् ।
आरक्षकाणामपवित्रहस्तैरित्यन्यसंस्पर्शविधिर्निषिद्धः ॥ २६ ॥

समुह्यमानं सदनात्तदन्नं दिने दिने दीनजनप्रदेयम् ।
स्पर्शं विना दूरत एव दक्षैः स्पृहाकुलैर्द्वाःस्थकुलैरलोकि ॥ २७ ॥

ततश्चतुर्भिर्दिवसैः प्रभाते बहिर्जिनामा स सखा शिवस्य ।
तं रामसिंहं सहसाभ्युपेत्य ह्यस्त्याथ्यविघ्नः शिव इत्युवाच ॥ २८ ॥

वार्ता श्रुतासौ बहुभिः सखेदं तथाऽपरेभ्यः कथिता च लोकैः ।
म्लेच्छाधिपेन त्वमुना चरोक्ता सानन्दमाकर्णि महाधमेन ॥ २९ ॥

भिषग्वरेभ्यो विविधौषधानि बहिर्जिरानाययदात्मवक्ष्यः ।
व्याधिस्तु केनाप्यचिकित्सितोऽसौ दिने दिने संववृधे क्रमेण ॥ ३० ॥

स्वां रुग्णशय्यां सततं श्रितोऽसौ शिवो भृशं दुर्लभदर्शनोऽभूत् ।
फौलादखानोऽपि हि रोगभीतो न प्राविशत् तं वत रुग्णकक्षम् ॥ ३१ ॥

ततो व्यतीते किल कृष्णजन्ममहोत्सवे श्रावणकृष्णपक्षे ।
सायं कदाचित् वसुदेवतुल्यं शिवोऽद्भुतं साहसकर्म चक्रे ॥ ३२ ॥

स्मरन्नितान्तं कुलदेवतां स्वां गुरुं समर्थं जननीं च पूज्याम् ।
वृहत्करण्डे निभृतोपविष्टः कारालयं त्यक्तुमसौ प्रवृत्तः ॥ ३३ ॥

किशोरकोऽसावपि शम्भुराजः करण्डकेऽन्यत्र दृढं निगूढः ।
पितुर्निदेशान् हृदये दधानः कारालयाद् यातुमभूत् सुसज्जः ॥ ३४ ॥

मिष्टान्नपूर्णान्यकरण्डतुल्यावस्पर्शितौ द्वाःस्थगणैरशङ्कम् ।
सम्मुह्यमानौ वत तौ करण्डौ बहिर्गतौ कुत्रचिदज्ञसैव ॥ ३५ ॥

नवाम्बुदैर्मेदुरितान्धकारे निशामुखे निर्जनदुष्पथेन ।
करण्डकौ तौ शिवशम्भुगर्भौ नीतौ यथा लुण्टितरत्नकोशौ ॥ ३६ ॥

सखा बहिर्जिः शिवतुल्यरूपः करे दधानः कटकं शिवस्य ।
निगूह्य तत्प्रावरणेन चाङ्गं तत्रैव तल्पेऽस्वपदाप्रभातम् ॥ ३७ ॥

फौलादखानो निशि गूढमेत्य सुप्तं शिवाजिं तमवेत्य कक्षे ।
मा भङ्क्त निद्रासिति सर्वभृत्यानाज्ञाप्य सुप्त्यै स्वगृहं जगाम ॥ ३८ ॥

मदारिनामा च युवा निशान्ते शुश्रूषणे कूट-शिवस्य लग्नः ।
निशस्तुरीये प्रहरे भिषग्भ्यो भेषज्यमानेतुमपप्रयातः ॥ ३९ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नराकृतौ तल्पगतोपबर्हे पिधाय तत् प्रावरणं शिवस्य ।
मा भङ्क्त निद्रामिति सर्वभृत्यान् विज्ञाप्य यातः स बहिर्बहिर्जिः ॥४०॥

क्रमेण चान्ये सुहृदः शिवस्य प्रयोजनं किञ्चन रक्षकेभ्यः ।
निवेद्य तस्मिन् दिवसे प्रयुक्त्या कारागृहाद्दूरमभिप्रयाताः ॥ ४१ ॥

मध्यन्दिनान्ते स पुराधिकारी फौलादखानः शिवमभ्युपेतः ।
गाढप्रसुप्तं तमवेक्ष्य तल्पे चक्रे सुहृद्भिः सह धूम्रपानम् ॥ ४२ ॥

चिराय निःशब्दमदः प्रकोष्ठं सर्वत्र विज्ञाय च निर्मनुष्यम् ।
काचिद् विशङ्काच्छुरिका सुतीव्रा चिच्छेद चेतः प्रसभं तदीयम् ॥४३॥

शब्दापयंस्तं सहसा बहिर्जिं तथोच्चकैस्तं युवकं मदारिम् ।
शुश्राव साश्चर्यभयाभिभूतः प्रतिध्वनिं केवलमात्मनोऽसौ ॥ ४४ ॥

आकल्यतस्तान् बहिरेव यातान् नानानिमित्तैः सकलान् वगत्य ।
रोगाभिभूतं स हि मूढधीस्तं नूनं शिवाजिं मृतमेव मेने ॥ ४५ ॥

शय्यासमीपे सहसोपसृत्य प्रबोधयंस्तं मृदुमन्दशब्दैः ।
निश्वासशून्यं मृतमेव मत्वा हस्तेन तत्प्रावरणं चकर्ष ॥ ४६ ॥

शिवाजिशून्यं तदवेक्ष्य तल्पं विस्फारिताक्षः प्रविदारितास्यः ।
संशुष्ककण्ठः स हि नष्टबुद्धिराक्रोशदाविद्धवराहघोरम् ॥ ४७ ॥

प्रपूरविध्वस्ततटी नदीव वार्ता ह्यसौ प्रासरदासमन्तात् ।
यां शृण्वता भूमिभुजा सरोषं करेण भालं बहु ताडितं स्वम् ॥ ४८ ॥

प्रतीक्षमाणा मरणं शिवस्य राजस्वस्राद्या अधमा यवन्यः ।
प्रवञ्चिता निर्गमनेन तस्य प्रताडयामासुरुरांस्यमन्दम् ॥ ४९ ॥

औरङ्गजेबस्य कुशासनेन ह्युद्वेजितास्तेऽखिलहिन्दुलोकाः ।
आकर्ण्य वृत्तान्तममुं विचित्रं नितान्तमन्तःकरणे प्रसेदुः ॥ ५० ॥

—वर्णेकरविरचितात् 'शिवराज्योदयात्' ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

४. प्रजापतेर्दकारोपदेशः ।

त्रयः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुराः । उषित्वा ब्रह्मचर्यं देवा ऊचुः, ब्रवीतु नो भवान् इति । तेभ्यो हैतदक्षरमुवाच 'द' इति । व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुः । 'दाम्यत' इति न आत्थेति । 'ओम्' इति होवाच व्यज्ञासिष्टेति । अथ हैनं मनुष्या ऊचुः, ब्रवीतु नो भवान् इति । तेभ्यो हैतदेवाक्षरमुवाच 'द' इति । व्यज्ञासिष्टा३ इति, व्यज्ञासिष्मेति होचुः । 'दत्त' इति न आत्थेति । 'ओम्' इति होवाच व्यज्ञासिष्टेति । अथैनमसुरा ऊचुः, ब्रवीतु नो भवान् इति । तेभ्यो हैतदेवाक्षरमुवाच 'द' इति । व्यज्ञासिष्टा३ इति, व्यज्ञासिष्मेति होचुः । 'दयध्वम्' इति न आत्थेति । 'ओम्' इति होवाच व्यज्ञासिष्टेति । तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुः द द द इति । दाम्यत दत्त दयध्वम् इति । तदेतत् त्रयं शिक्षेद् दमं दानं दयामिति ।

—बृहदारण्यकोपनिषद्

पञ्चमोऽध्यायः खण्डाः १–३

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५. (अ) शुककथा ।

इत्येवं चिन्तयत्येव मयि तस्मात्सरसो नातिदूरवर्तिनि तपोवने जाबालिर्नाम महातपा मुनिः प्रतिवसति स्म । तत्तनयश्च हारीतनामा मुनिकुमारकः सनत्कुमार इव सर्वविद्यावदातचेताः समानवयोभिरपरैस्तपोधनकुमारैरनुगम्यमानस्तेनैव पथा द्वितीय इव भगवान्विभावसुरतितेजस्वितया दुर्निरीक्ष्यमूर्तिरुपजातपरिचयेन नीवारमुष्टिसंवर्धितेन तपोवनमृगेणानुगम्यमानो राहुरिवासकृदास्वादितसोमः सन्निहितनेत्रद्वयोऽपि परित्यक्तवामलोचनस्तदेव कमलसरः सिस्नासुरुपागमत् ।

प्रायेणाकारणमित्राणि सतां खलु भवन्ति सदा चेतांसि । यतः स मां तदवस्थमालोक्य समुपजातदयः समीपतरवर्तिनमृषिकुमारकमन्यतममब्रवीत् । अयं कथमपि शुकशिशुरसंज्ञातपक्षपुट एव तरुशिखरादस्मात्परिच्युतः । श्येनमुखपरिभ्रष्टेन वालेन प्रायो भवितव्यम् । तथा हि । अस्याल्पशेषं जीवितम् । अयमामीलितलोचनो मुहुर्मुहुश्चञ्चुपुटं विवृणोति । न शक्नोति शिरोधरां धारयितुम् । तदेहि, यावदेवायमसुभिर्न विमुच्यते तावदेव गृहाणैनमवतारय सलिलसमीपम् । इत्यभिधाय तेन मां सरस्तीरमनाययत् । उपसृत्य च जलसमीपमेकदेशनिहितदण्डकमण्डलुरादाय स्वयं मां मुक्तप्रयत्नमुत्तानितमुखमंगुल्या कतिचित्सलिलबिन्दूनपाययत् । अम्भःक्षोदकृतसेकं च समुपजातप्रश्रमुपतटप्ररूढस्य नलिनीपलाशस्य जलशिशिरायां छायायां निधाय यथासमुचितमकरोत्स्नानविधिम् । अभिषेकावसानेऽनेकप्राणायामपूतो जपन्नघमर्षणानि प्रत्यग्रभग्नैरुन्मुखो रक्तारविन्दैर्नलिनीपत्रपुटेन भगवते सवित्रे दत्वार्घमुदतिष्ठत् । आगृहीतधवलवल्कलश्च सज्योत्स्न इव सन्ध्यातपः करतलनिर्धूतविशदजटः कमण्डलुमापूर्य कमलकिञ्जल्कसुरभिणा शुचिना सरोवारिणा प्रत्यग्र-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्नानार्द्रजटेन सकलेन तेन मुनिकुमारकदम्बकेनानुगम्यमानो मां गृहीत्वा तपोवनाभिमुखं शनैः शनैरगच्छत्।

अनतिदूरमिव गत्वा सदा संनिहितकुसुमपटलैः काननैरुपगूढं पठ्यमानविविधपुस्तकं विचार्यमाणसकलशास्त्रार्थं खाण्डवविनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्यं सततविभूतहव्यधूमगन्धं मातङ्गकुलाध्यासितमपि पवित्रमतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्। यत्र च मलिनता हविर्धूमेषु न चरित्रेषु। मुनिबालनाशः क्रतुदीक्षया न मृत्युना। यत्र च भुजंगानां भोगः कपीनां श्रीफलाभिलाषो मूलानामधोगतिः।

तस्य चैवंविधस्य मध्यभागमलङ्कुर्वाणस्यालक्तकालोहितलोलपल्लवस्य रक्ताशोकतरोरधश्छायायामुपविष्टमतिदूरप्रवृद्धस्य तपस्तरोः कुसुममञ्जरीभिरिवोद्गताभिर्जटाभिरुपशोभमानमौर्वानलमिव सततपयोभक्षं पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जाबालिमपश्यम्।

—कादम्बरीसार, पृ. १३–१५.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५. (ब) भृत्यगुणाः ।

एवमादिष्टस्तु मेघनादो व्यज्ञापयत्। 'देवि, राजलोके तु का कथा भृत्यवर्गोऽपि सकल एवायं कन्दमूलफलाशी निश्चयं कृत्वा स्थितो यथाऽस्माकं मध्यादेकेनापि देवपादान्विना न प्रतीपं गन्तव्यमिति। भृत्या अपि त एव ये सम्पत्तेर्विपत्तौ सविशेषं सेवन्ते। समुन्नम्यमानाः सुतरामवनमन्ति। आलप्यमाना न समानालापाः संजायन्ते। स्तूयमाना नोत्सिच्यन्ते। क्षिप्यमाणा नापराधं गृह्णन्ति। उच्यमाना न प्रतीपं भाषन्ते। पृष्टा हितप्रियं विज्ञापयन्ति। अनादिष्टाः कुर्वन्ति। कृत्वा न जल्पन्ति। पराक्रम्य न विकत्थन्ते। विकथ्यमाना अपि लज्जामुद्वहन्ति। महाहवेष्वग्रतो ध्वजभूता इव लक्ष्यन्ते। दानकाले पलायमानाः पृष्ठतो निलीयन्ते। धनात्स्नेहं बहु मन्यन्ते। जीवितात्पुरो मरणमभिवाञ्छन्ति। गृहादपि स्वामिपादमूले सुखं तिष्ठन्ति। येषां च तृष्णा चरणपरिचर्यायां, असन्तोषो हृदयाराधने, व्यसनमाननावलोकने, वाचालता गुणग्रहणे, कार्पण्यमपरित्यागे भर्तुः। ये च विद्यमानेऽपि स्वात्मन्यस्वाधीनसकलेन्द्रियवृत्तयः पश्यन्तोऽप्यन्धा इव शृण्वन्तोऽपि बधिरा इव वाग्मिनोऽपि मूका इव जानन्तोऽपि जडा इवानुपहतकरचरणा अपि पङ्गव इव क्लीवा इवाकिञ्चित्कराः स्वात्मना स्वामिचित्तादर्शे प्रतिबिम्बवद्वर्तन्ते।

—महाकविना बाणभट्टेन विरचितायाः कादम्बर्याः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६. काव्यकृतः प्रति नृपतेर्भोजस्यौदार्यम् ।

एवं गच्छत्सु कतिपयदिवसेषु राजा विद्वत्प्रियो दानवित्तेश्वर इति प्रथामगात् । ततो राजानं दिदृक्षवः कवयो नानादिग्भ्यः समागताः । एवं वित्तादिव्ययं कुर्वाणं राजानं प्रति कदाचिन्मुख्यामात्येनेत्थमभ्यधायि — 'देव, राजानः कोशबला एव विजयिनः । नान्ये ।

स जयी वरमातङ्गा यस्य तस्यास्ति मेदिनी ।
कोशो यस्य स दुर्धर्षो दुर्गं यस्य स दुर्जयः ॥ ५९ ॥

देव, लोकं पश्य ।

प्रायो धनवतामेव धने तृष्णा गरीयसी ।
पश्य कोटिद्वयासक्तं लक्षाय प्रवणं धनुः' ॥ ६० ॥

इति । राजा च तमाह—

'दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।
पुंसां समाहिता लक्ष्मीरलक्ष्मीः क्रमशो भवेत्' ॥ ६१ ॥

इत्युक्त्वा राजा तं मन्त्रिणं निजपदादूरीकृत्य तत्पदेऽन्यं निवेशयामास । आह च तम् —

'लक्षं महाकवेर्देयं तदर्धं विबुधस्य च ।
देयं ग्रामैकमर्धस्य तस्याप्यर्धं तदर्थिनः ॥ ६२ ॥

यश्च मेऽमात्यादिषु वितरणनिषेधमनाः स हन्तव्यः । उक्तं च —

यद्ददाति यदश्नाति तदेव धनिनां धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ ६३ ॥

प्रियः प्रजानां दातैव न पुनर्द्रविणेश्वरः ।
अयच्छन्कोऽङ्क्यते लोकैर्वारिदो न तु वारिधिः ॥ ६४ ॥

सङ्ग्रहैकपरः प्रायः समुद्रोऽपि रसातले ।
दातारं जलदं पश्य गर्जन्तं भुवनोपरि' ॥ ६५ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५. (ब) भृत्यगुणाः ।

एवमादिष्टस्तु मेघनादो व्यज्ञापयत्। 'देवि, राजलोके तु का कथा भृत्यवर्गोऽपि सकल एवायं कन्दमूलफलाशी निश्चयं कृत्वा स्थितो यथाऽस्माकं मध्यादेकेनापि देवपादान्विना न प्रतीपं गन्तव्यमिति। भृत्या अपि त एव ये सम्पत्तेर्विपत्तौ सविशेषं सेवन्ते। समुन्नम्यमानाः सुतरामवनमन्ति। आलप्यमाना न समानालापाः संजायन्ते। स्तूयमाना नोत्सिच्यन्ते। क्षिप्यमाणा नापराग गृह्णन्ति। उच्यमाना न प्रतीपं भाषन्ते। पृष्टा हितप्रियं विज्ञापयन्ति। अनादिष्टाः कुर्वन्ति। कृत्वा न जल्पन्ति। पराक्रम्य न विकत्थन्ते। विकत्थ्यमाना अपि लज्जामुद्वहन्ति। महाहवेष्वग्रतो ध्वजभूता इव लक्ष्यन्ते। दानकाले पलायमानाः पृष्ठतो निलीयन्ते। धनात्स्नेहं बहु मन्यन्ते। जीवितात्पुरो मरणमभिवाञ्छन्ति। गृहादपि स्वामिपादमूले सुखं तिष्ठन्ति। येषां च तृष्णा चरणपरिचर्यायां, असन्तोषो हृदयाराधने, व्यसनमाननावलोकने, वाचालता गुणग्रहणे, कार्पण्यमपरित्यागे भर्तुः। ये च विद्यमानेऽपि स्वात्मन्यस्वाधीनसकलेन्द्रियवृत्तयः पश्यन्तोऽप्यन्धा इव शृण्वन्तोऽपि बधिरा इव वाग्मिनोऽपि मूका इव जानन्तोऽपि जडा इवानुपहतकरचरणा अपि पङ्गव इव क्लीवा इवाकिञ्चित्कराः स्वात्मना स्वामिचित्तादर्शे प्रतिबिम्बवद्वर्तन्ते।

—महाकविना बाणभट्टेन विरचितायाः कादम्बर्याः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६. काव्यकृतः प्रति नृपतेर्भोजस्यौदार्यम् ।

एवं गच्छत्सु कतिपयदिवसेषु राजा विद्वत्प्रियो दानवित्तेश्वर इति प्रथामगात् । ततो राजानं दिदृक्षवः कवयो नानादिग्भ्यः समागताः । एवं वित्तादिव्ययं कुर्वाणं राजानं प्रति कदाचिन्मुख्यामात्येनेत्थमभ्यधायि — 'देव, राजानः कोशबला एव विजयिनः । नान्ये ।

स जयी वरमातङ्गा यस्य तस्यास्ति मेदिनी ।
कोशो यस्य स दुर्धर्षो दुर्गं यस्य स दुर्जयः ॥ ५९ ॥

देव, लोकं पश्य ।

प्रायो धनवतामेव धने तृष्णा गरीयसी ।
पश्य कोटिद्वयासक्तं लक्षाय प्रवणं धनुः' ॥ ६० ॥

इति । राजा च तमाह—

'दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।
पुंसां समाहिता लक्ष्मीरलक्ष्मीः क्रमशो भवेत्' ॥ ६१ ॥

इत्युक्त्वा राजा तं मन्त्रिणं निजपदादूरीकृत्य तत्पदेऽन्यं निवेशयामास । आह च तम् —

'लक्षं महाकवेर्देयं तदर्धं विबुधस्य च ।
देयं ग्रामैकमर्धस्य तस्याप्यर्धं तदर्थिनः ॥ ६२ ॥

यश्च मेऽमात्यादिषु वितरणनिषेधमनाः स हन्तव्यः । उक्तं च —

यद्ददाति यदश्नाति तदेव धनिनां धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ ६३ ॥

प्रियः प्रजानां दातैव न पुनर्द्रविणेश्वरः ।
अयच्छन्कोऽङ्क्यते लोकैर्वारिदो न तु वारिधिः ॥ ६४ ॥

सङ्गहैकपरः प्रायः समुद्रोऽपि रसातले ।
दातारं जलदं पश्य गर्जन्तं भुवनोपरि' ॥ ६५ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं वितरणशालिनं भोजराजं श्रुत्वा कश्चित्कलिङ्गदेशात्कविरुपेत्य मासमात्रं तस्थौ। न च क्षोणीन्द्रदर्शनं भवति। आहारार्थं पाथेयमपि नास्ति। ततः कदाचिद्राजा मृगयाभिलाषी बहिर्निर्गतः। स कविर्दृष्ट्वा राजानमाह—

'दृष्टे श्रीभोजराजेन्द्रे गलन्ति त्रीणि तत्क्षणात्।
शत्रोः शस्त्रं कवेः कण्ठं नीवीबन्धो मृगीदृशाम्' ॥ ६६ ॥

राजा लक्षं ददौ। ततस्तस्मिन्मृगयारसिके राजनि कश्चन पुलिन्दपुत्रो गायति। तद्गीतमाधुर्येण तुष्टो राजा तस्मै पुलिन्दपुत्राय पञ्चलक्षं ददौ। तदा कविस्तद्दानमत्युन्नतं किरातपोतं च दृष्ट्वा नरेन्द्रपाणिकमलस्थपङ्कजमिषेण राजानं वदति—

'एते हि गुणाः पङ्कज सन्तोऽपि न ते प्रकाशमायान्ति।
यल्लक्ष्मीवसतेस्तव मधुपैरुपभुज्यते कोशः' ॥ ६७ ॥

भोजस्तमभिप्रायं ज्ञात्वा पुनर्लक्षमेकं ददौ। ततो राजा ब्राह्मणमाह—

'प्रभुभिः पूज्यते विप्र कलैव न कुलीनता।
कलावान्मान्यते मूर्ध्नि सत्सु देवेषु शम्भुना' ॥ ६८ ॥

एवं वदति भोजे कुतोऽपि पञ्चषाः कवयः समागताः। तान्दृष्ट्वा राजा विलक्षण इवासीत्—'अद्यैव मयैतावद्वित्तं दत्तम्' इति। ततः कविस्तमभिप्रायं ज्ञात्वा नृपं पद्ममिषेण पुनः प्राह—

'किं कुप्यसि कस्मैचन सौरभसाराय कुप्य निजमधुने।
यस्य कृते शतपत्र प्रतिपत्रं तेऽद्य मृग्यते भ्रमरैः' ॥ ६९ ॥

ततः प्रभुं प्रसन्नवदनमवलोक्य प्रकाशेन प्राह—

'न दातुं नोपभोक्तुं च शक्नोति कृपणः श्रियम्।
किन्तु स्पृशति हस्तेन नपुंसक इव स्त्रियम् ॥ ७० ॥

याचितो यः प्रहृष्येत दत्त्वा च प्रीतिमान्भवेत्।
तं दृष्ट्वाप्यथवा श्रुत्वा नरः स्वर्गमवाप्नुयात्' ॥ ७१ ॥

ततस्तुष्टो राजा पुनरपि कलिङ्गदेशवासिकवये लक्षं ददौ। ततः पूर्वकविः पुरःस्थितान्षट्कवीन्द्रान्दृष्ट्वाह—

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

'हे कवयः, अत्र महासरःसेतुभूमौवासी राजा यदा भवनं गमिष्यति तदा किमपि ब्रूत इति। ते च सर्वे महाकवयोऽपि सर्वं राज्ञः प्रथमचेष्टितं ज्ञात्वावर्तन्त। तेष्वेकः सरोमिषेण नृपं प्राह—

'आगतानामपूर्णानां पूर्णानामपि गच्छताम्।
यदध्वनि न सङ्घट्टो घटानां तत्सरो वरम्' ॥७२॥

इति। तस्य राजा लक्षं ददौ। ततो गोविन्दपण्डितस्तान्कवीन्द्रान्दृष्ट्वा चुकोप। तस्य कोपाभिप्रायं ज्ञात्वा द्वितीयः कविराह—

'कस्य तृषं न क्षपयसि पिबति न कस्तव पयः प्रविश्यान्तः।
यदि सन्मार्गसरोवर नक्रो न क्रोडमधिवसति' ॥७३॥

राजा तस्मै लक्षद्वयं ददौ। तं च गोविन्दपण्डितं व्यापारपदादूरीकृत्य 'त्वयापि सभायामागन्तव्यम्' परं तु केनापि दौष्ट्यं न कर्तव्यम्' इत्युक्त्वा ततस्तेभ्यः प्रत्येकं लक्षं दत्वा स्वनगरमागतः। ते च यथायथं गताः।

—श्रीबल्लालविरचिताद् भोजप्रबन्धात्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(प्रविश्य।) शिष्यः—उपाध्याय, कालपाशिको दण्डपाशिकश्च उपाध्यायं विज्ञापयतः। इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनमिति।

चाण०—शोभनम्। वत्स, मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः—तथा (इति निष्क्रम्य चन्दनदासेन सह प्रविश्य।) इत इतः श्रेष्ठिन्।

चन्दनदासः—(स्वगतम्।)

चाणक्येनाकरुणेन सहसा शब्दायितस्यापि जनस्य।
निर्दोषस्यापि शङ्का किं पुनर्मम जातदोषस्य ॥ २१॥

(चाणक्कम्मि अकरुणे सहसा सद्दाविदस्स वि जणस्स।
णिद्दोसस्स वि सङ्का किं उण मह जाददोसस्स ॥)

तस्माद्भणिता मया धनसेनप्रमुखा निजनिवेशसंस्थिताः कदापि चाणक्यहतको गेहं मे विचिनोति। तस्मादवहिता निर्वहत भर्तुरमात्यराक्षसस्य गृहजनम्। मम तावद्यद्भवति तद्भवत्विति। (ता भणिदा मए धणसेणप्पमुहा णिअणिवेससंठिआँ कदावि चाणक्कहदओ गेहं मे विचिण्णावेदि। ता अवहिदा णिव्वहेह भट्टिणो अमच्चरक्खसस्स घरअणं। मह दाव जं होदि तं होदु त्ति।)

शिष्यः—भोः श्रेष्ठिन्, इत इतः।

चन्द०—अयमागच्छामि। (अअमाअच्छामि।)
(उभौ परिक्रमतः।)

शिष्यः—(उपसृत्य।) उपाध्याय अयं श्रेष्ठी चन्दनदासः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चन्द०--जयत्वार्यः । (जेदु अज्जो ।)

चाण०--(नाट्येनावलोक्य ।) श्रेष्ठिन्, स्वागतमिदमासनमास्यताम् ।

चन्द०--(प्रणम्य ।) किं न जानात्यार्यः यथानुचित उपचारो हृदयस्य परिभवादपि महद्दुःखमुत्पादयति । तस्मादिहैवोचितायां भूमावुपविशामि । (किं ण जाणादि अज्जो जह अणुचिदो उवआरो हिअअस्स परिहवादोवि महन्तं दुःखमुप्पादेदि । ता इह ज्जेव उचिदाए भूमीए उवविसामि ।)

चाण०—भोः श्रेष्ठिन्, मा मैवम् । संभावितमेवेदमस्मद्विधैः भवतः । तदुपविश्यतामासन एव ।

चन्द०—(स्वगतम् ।) उपक्षिप्तमनेन दुष्टेन किमपि । (प्रकाशम् ।) यदार्य आज्ञापयति । (इत्युपविष्टः ।) (उवक्खित्तमणेण दुट्ठेन किंवि । जं अज्जो आणवेदि ।)

चाण०—भोः श्रेष्ठिन् चन्दनदास, अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः ।

चन्द०—(स्वगतम् ।) अत्यादरः शङ्कनीयः । (प्रकाशम्) अथ किम् । आर्यस्य प्रसादेन अखण्डिता मे वणिज्या । (अच्चादरो सङ्कणीओ ।) (अहइं । अज्जस्स प्पसाएण अखण्डिदा मे वणिज्जा ।)

चाण०—न खलु चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणानधुना स्मरयन्ति प्रकृतीः ।

चन्द०—(कर्णौ पिधाय ।) शान्तं पापम् । शारदनिशासमुद्भूतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रियाधिकं नन्दन्ति प्रकृतयः । (सन्तं पावं । सारअणिसासमुग्गएण विअ पुण्णिमाचन्देण चन्दसिरिणा अहिअं णन्दन्ति पकिदिओ ।)

चाण०—भोः श्रेष्ठिन्, यद्येवं प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चन्द०—आज्ञापयतु आर्यः। किं कियदस्माज्जनादिष्यत इति। (आणवेदु अज्जो किं कित्तिअं इमादो जणादो इच्छीअदि त्ति।)

चाण०—भोः श्रेष्ठिन्, चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। यतो नन्दस्यैवार्थरुचेरर्थसम्बन्धः प्रीतिमुत्पादयति चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्द०—(सहर्षम्।) आर्य, अनुगृहीतोऽस्मि। (अज्ज अणुग्गहीदोह्मि।)

चाण०—भोः श्रेष्ठिन् स चापरिक्लेशः कथमाविर्भवतीति ननु भवता प्रष्टव्याः स्मः।

चन्द०—आज्ञापयतु आर्यः। (आणवेदु अज्जो।)

चाण०—संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्तितव्यम्।

चन्द०—आर्य कः पुनरधन्यो राज्ञा विरुद्ध इति आर्येणावगम्यते। (अज्ज को उण अधण्णो रण्णा विरुद्धोति अज्जेण अवगच्छीअदि।)

चाण०—भवानेव तावत्प्रथमम्।

चन्द०—(कर्णौ पिधाय।) शान्तं पापं शान्तं पापम्। कीदृशस्तृणानामग्निना सह विरोधः। (सन्तं पावं सन्तं पावं। कीदिसो तिणाणं अग्गिणा सह विरोहो।)

चाण०—अयमीदृशो विरोधः। यत्त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

चन्द०—आर्य अलीकमेतत्केनाप्यनभिज्ञेन आर्यस्य निवेदितम्। (अज्ज अलीअं एदं केणावि अणभिण्णेण अज्जस्स णिवेदिदं।)

चाण०—भोः श्रेष्ठित् अलमाशङ्कया। भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चन्द०—एवं नु इदम्। तस्मिन् समय आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति। (एवंण्णेदं। तस्सिं समये आसि अह्मघरे अमच्चरक्खसस्स घरअणो त्ति।)

चाण०—पूर्वमनृतमिदानीमासीदिति परस्परविरोधिनी वचने।

चन्द०—एतावदेवास्ति मे वाक्छलम्। (एत्तिअं जेव्व अत्थि मे वाआच्छलम्।)

चाण०—भोः श्रेष्ठिन् चन्द्रगुप्ते राजन्यपरिग्रहश्छलानाम्। तत्समर्पय राक्षसस्य गृहजनम्। अच्छलं भवतु भवतः।

चन्द०—आर्य ननु विज्ञापयामि आसीदस्मद्गृहे अमात्य-राक्षसस्य गृहजन इति। (अज्ज णं विण्णवेमि आसी अह्मघरे अमच्चरक्खस्स घरअणो त्ति।)

चाण०—अथेदानीं क्व गतः।

चन्द०—न जानामि। (ण जाणामि।)

चाण०—(स्मितं कृत्वा।) कथं न ज्ञायते नाम। भोः श्रेष्ठिन् शिरसि भयमतिदूरे तत्प्रतीकारः। अन्यच्च नन्दमिव विष्णुगुप्तः (इत्यर्धोक्ते लज्जां नाटयित्वा।) चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मा मैवं मंस्थाः। पश्य।

विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीचैक्रनासादिभि—
र्नन्दे जीवति या तदा न गमिता स्थैर्यं चलन्ती मुहुः।

तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्
कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत्पृथक् ॥ २२॥

अपि च।

आस्वादितद्विरदशोणितशोणशोभाम् (इति पूर्वोक्तं पठति।)

चन्द०—फलेन संवादितमस्य विकत्थितम्। (स्वगतम्।) (फलेन संवादिदं से विकत्थिदम्।)

(नेपथ्ये कलकलः।)

चाण०—शार्ङ्गरव ज्ञायतां किमेतत्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिष्यः—तथा। (इति निष्क्रम्य पुनः प्रविश्य।) उपाध्याय, एष राज्ञश्चन्द्रगुप्तस्याज्ञया राजापथ्यकारी क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वास्यते।

चाण०—क्षपणक अहह। अथवा अनुभव राजापथ्यकारित्वस्य फलम्। भोः श्रेष्ठिन्, चन्दनदास एवमयमपथ्यकारिषु तीक्ष्णदण्डो राजा। तत्क्रियतां पथ्यं सुहृद्वचः। समर्प्यतां राक्षसगृहजनः। अनुभूयतां चिरं विचित्रो राजप्रसादः।

चन्द०—नास्ति मे गेहे अमात्यगृहजनः। (णत्थि मे गेहे अमच्चघरअणो।)

(नेपथ्ये पुनः कलकलः।)

चाण०—शार्ङ्गरव, ज्ञायतां किमेतत्।

शिष्यः—तथा। (इति निष्क्रम्य पुनः प्रविश्य) उपाध्याय, अयमपि राजापथ्यकार्येव कायस्थः शकटदासः शूलमारोपयितुं नीयते।

चाण०—स्वकर्मफलमनुभवतु। भोः श्रेष्ठिन्, एवमयं राजापथ्यकारिषु तीक्ष्णदण्डो राजा न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः। तद्रक्ष परकलत्रेणात्मनः कलत्रं जीवितं च।

चन्द०—आर्य, किं मे भयं दर्शयसि। सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि किं पुनरसन्तम्। (अज्ज किं मे भअं दावेसि। सन्तं वि गेहे अमच्चरक्खसस्स घरअणं ण समप्पेमि किं उण असन्तं।)

चाण०—चन्दनदास, एष ते निश्चयः।

चन्द०—बाढम्। एष मे निश्चयः। (बाढं। एसो मे णिच्चओ।)

चाण०—(स्वगतम्।) साधु, चन्दनदास साधु।

सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिबिना विना॥ २३॥

(प्रकाशम्।) चन्दनदास, एष ते निश्चयः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चन्द०—बाढम्। (वाढम्।)

चाण०—(सक्रोधम्।) दुरात्मन्, दुष्टवणिक्, अनुभूयतां तर्हि नरपतिक्रोधः।

चन्द०—सज्जोऽस्मि। अनुतिष्ठतु आर्यः आत्मनोऽधिकारसदृशम्। (सज्जोह्मि। अणुचिट्ठदु अज्जो अत्तणो अहिआरसरिसं।)

चाण०—शार्ङ्गरव, उच्यतामस्मद्वचनात्कालपाशिको दण्डपाशिकश्च। शीघ्रमयं दुष्टवणिक् निगृह्यताम्। अथवा तिष्ठतु। उच्यतां दुर्गपालो विजयपालः गृहीतगृहसारमेनं सपुत्रकलत्रं संयम्य तावद्रक्ष यावन्मया वृषलाय कथ्यते। वृषल एवास्य प्राणहरं दण्डमाज्ञापयिष्यति।

शिष्यः—यदाज्ञापयत्युपाध्यायः। श्रेष्ठिन् इत इतः।

चन्द०—आर्य, अयमागच्छामि। (स्वगतम्।) दिष्ट्या मित्रकार्येण मे विनाशो न पुरुषदोषेण। (अज्ज अअमाअच्छामि। दिट्ठिआ मित्तकज्जेण मे विणासो ण पुरिसदोसेण।)

(परिक्रम्य शिष्येण सह निष्क्रान्तः।)

चाण०—(सहर्षम्) हन्त लब्ध इदानीं राक्षसः। कुतः।

त्यजत्यप्रियवत्प्राणान्यथा तस्यायमापदि।
तथैवास्यापदि प्राणा नूनं तस्यापि न प्रियाः॥ २४॥

—विशाखदत्तविरचितस्य 'मुद्राराक्षसम्' इत्यस्य
नाटकस्य प्रथमादङ्कात्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८. द्रौपदीकृता युधिष्ठिरस्य निर्भर्त्सना ।

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसंनिधौ वचः ॥ १ ॥

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ २ ॥

भवादृशेषु प्रमदाजनोचितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ ३ ॥

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥ ४ ॥

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥ ५ ॥

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ६ ॥

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ७ ॥

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ ८ ॥

परिश्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥ ९ ॥

विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुना हरन् करोति मन्युं न कथं धनञ्जयः ॥ १० ॥

वनान्तशय्याकठिनीकृताकृती कचाचितौ विश्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥ ११ ॥

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥ १२ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥१३॥

पुरोपनीतं नृप रामयणीकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥ १४ ॥

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ १५ ॥

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥ १६ ॥

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥१७॥

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता॥ १८ ॥

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सन् जुहुधीह
पावकम् ॥ १९ ॥

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि ॥ २० ॥

—महाकविना भारविणा प्रणीतस्य महाकाव्यस्य
'किरातार्जुनीय' संज्ञितस्य प्रथमतः सर्गात् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१. कविवाङ्निर्मितिः काव्यप्रयोजनानि काव्यहेतुश्च ।

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥ १ ॥

नियतिशक्त्या नियतरूपा, सुखदुःखमोहस्वभावा, परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा, षड्रसा, न च ह्लादैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम् । एतद्विलक्षणा तु कविवाङ्निर्मितिः । अत एव जयति । जयत्यर्थेन च नमस्कार आक्षिप्यते, इति तां प्रति अस्मि प्रणतः, इति लभ्यते ।

× × × ×

इहाभिधेयं सप्रयोजनम्, इत्याह—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥ २ ॥

कालिदासादीनामिव यशः, श्रीहर्षदेर्बाणादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्, प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म, तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवत्, इत्युपदेशं च यथायोगं कवेः सहृदयस्य च करोति इति सर्वथा तत्र यतनीयम् ॥

× × × ×

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवमस्य प्रयोजनमुक्त्वा कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ ३ ॥

'शक्तिः' कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत्, प्रसृतं वा उपहसनीयं स्यात् । 'लोकस्य' स्थावर-जङ्गमात्मकलोकवृत्तस्य, 'शास्त्राणाम्' छन्दोव्याकरणाभिधान-कोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानाम्, 'काव्यानाम्' च महाकविसम्बन्धिनाम्, 'आदि'ग्रहणात् इतिहासादीनां च विमर्शनाद् व्युत्पत्तिः । काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिः, इति त्रयः समुदिताः, न तु व्यस्ताः, 'तस्य' काव्यस्य 'उद्भवे' निर्माणे समुल्लासे च 'हेतुः' न तु हेतवः ॥

—काव्यप्रकाश उल्लास १

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१०. अनुजीविवृत्तम् ।

लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसंपन्नं प्रियहितद्वारेणाश्रयेत ॥ १ ॥ यं वा मन्येत 'यथाहमाश्रयेप्सुरेवमसौ विनयेप्सुराभिगामिकगुणयुक्तः' इति, द्रव्यप्रकृतिहीनमप्येनमाश्रयेत, न त्वेवानात्मसंपन्नम् ॥ २ ॥ अनात्मवान् हि नीतिशास्त्रद्वेषादनर्थ्यसंयोगाद्वा प्राप्यापि महदैश्वर्यं न भवति ॥ ३ ॥

आत्मवति लब्धावकाशः शास्त्रानुयोगं दद्यात् ॥ ४ ॥ अविसंवादाद्धि स्थानस्थैर्यमवाप्नोति ॥ ५ ॥ मतिकर्मसु पृष्टस्तदात्वे चायत्यां च धर्मार्थसंयुक्तं प्रवीणवदरिपक्षद्वीरुः कथयेत् ॥ ५ ॥

ईप्सितः पणेत 'धर्मार्थानुयोगमविशिष्टेषु बलवत्संयुक्तेषु दण्डधारणं मत्संयोगे तदात्वे च दण्डधारणमिति न कुर्याः पक्षं वृत्तिं गुह्यं च मे नोपहन्याः, संज्ञया च त्वां कामक्रोधदण्डनेषु वारयेयम्' इति ॥ ७ ॥

आदिष्टः प्रदिष्टायां भूमावनुज्ञातः प्रविशेत्, उपविशेच्च पार्श्वतः संनिकृष्टविप्रकृष्टः परासनम् ॥ ८ ॥ विगृह्य कथनमसभ्यमप्रत्यक्षमश्रद्धेयमनृतं च वाक्यमुच्चैरनर्मणि हासं वातष्ठीवने च शब्दवती न कुर्यात् ॥ ९ ॥ मिथः कथनमन्येन, जनवादे द्वन्द्वकथनं, राज्ञो वेषम् उद्धतकुहकनां च, रत्नातिशयप्रकाशाभ्यर्थनम्, एकाक्ष्योष्ठनिर्भोगं भ्रुकुटीकर्म वाक्यावक्षेपणं च ब्रुवति, बलवत्संयुक्तविरोधं, स्त्रीभिः स्त्रीदर्शिभिः सामन्तदूतैर्द्वेष्यपक्षापक्षिप्तानर्थ्यैश्च प्रतिसंसर्गमेकार्थचर्यां संघातं च वर्जयेत् ॥ १० ॥

अहीनकालं राजार्थं स्वार्थं प्रियहितैः सह ।
परार्थं देशकाले च ब्रूयाद्धर्मार्थसंहितम् ॥ ११ ॥

पृष्टः प्रियहितं ब्रूयान्न ब्रूयादहितं प्रियम् ।
अप्रियं वा हितं ब्रूयाच्छृण्वतोऽनुमतो मिथः ॥ १२ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तूष्णीं वा प्रतिवाक्ये स्याद्द्वेष्यादींश्च न वर्णयेत् ।
अप्रिया अपि दक्षाः स्युस्तद्भावाद्य बहिष्कृताः ॥ १३ ॥

अनर्थ्याश्च प्रिया दृष्ट्वाश्चित्तज्ञानानुवर्तिनः ।
अभिहास्येष्वभिहसेद्घोरहासांश्च वर्जयेत् ॥ १४ ॥

परात्संक्रामयेद्घोरं न च घोरं परे वदेत् ।
तितिक्षेतात्मनश्चैव क्षमावान् पृथिवीसमः ॥ १५ ॥

आत्मरक्षा हि सततं पूर्वं कार्या विजानता ।
अन्नाविव हि सम्प्रोक्ता वृत्ती राजोपजीविनाम् ॥ १६ ॥

एकदेशं दहेदग्निः शरीरं वा परं गतः ।
सपुत्रदारं राजा तु घातयेदर्धयेत वा ॥ १७ ॥

इति कौटिलीयेऽर्थशास्त्रे योगवृत्ते पञ्चमेऽधिकरणे
अनुजीविवृत्तं चतुर्थोऽध्यायः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

११. भक्तियोगः ।

अर्जुन उवाच ।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

श्रीभगवानुवाच ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात् पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ ९ ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥ १० ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १३ ॥

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥ १७ ॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येनकेनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥ १९ ॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

—भगवद्गीता, अध्याय १२.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi